# श्रीमद् भागवत रसिक कुटुंब

## तुलसीकवचम्

**श्रीगणेशाय नमः**

**अस्य श्रीतुलसीकवचस्तोत्रमन्त्रस्य श्रीमहादेवऋषिः ।**
**अनुष्टुप्छन्दः । श्रीतुलसी देवता ।**
**मम ईप्सितकामनासिद्ध्यर्थं(ञ्) जपे विनियोगः ।**

**तुलसि श्रीमहादेवि, नमः(फ्) पङ्कजधारिणि ।**
**शिरो मे तुलसी पातु, भालं(म्) पातु यशस्विनी ॥ 1॥**

**दृशौ मे पद्मनयना, श्रीसखी श्रवणे मम ।**
**घ्राणं(म्) पातु सुगन्धा मे, मुखं(ञ्) च सुमुखी मम ॥ 2॥**

**जिह्वां(म्) मे पातु शुभदा, कण्ठं(वँ) विद्यामयी मम ।**
**स्कन्धौ कह्लारिणी पातु, हृदयं(वँ) विष्णुवल्लभा ॥ 3॥**

**पुण्यदा मे पातु मध्यं(न्), नाभिं(म्) सौभाग्यदायिनी ।**
**कटिं(ङ्) कुण्डलिनिं(म्) पातु, ऊरू नारदवन्दिता ॥ 4॥**

**जननी जानुनी पातु, जङ्घे सकलवन्दिता ।**
**नारायणप्रिया पादौ, सर्वाङ्गं(म्) सर्वरक्षिणी ॥ 5॥**

सङ्कटे विषमे दुर्गे, भये वादे महाहवे ।
नित्यं(म्) हि सन्ध्ययोः(फ्) पातु, तुलसी सर्वतः(स्) सदा ॥ 6॥

इतीदं(म्) परमं(ङ्) गुह्यं(न्), तुलस्याः(ख्) कवचामृतम् ।
मर्त्यानाममृतार्थाय, भीतानामभयाय च ॥ 7॥

मोक्षाय च मुमुक्षूणां(न्), ध्यायिनां(न्) ध्यानयोगकृत् ।
वशाय वश्यकामानां(वँ), विद्यायै वेदवादिनाम् ॥ 8॥

द्रविणाय दरिद्राणां(म्), पापिनां(म्) पापशान्तये ॥ 9॥

अन्नाय क्षुधितानां(ञ्) च, स्वर्गाय स्वर्गमिच्छिताम् ।
पशव्यं(म्) पशुकामानां(म्), पुत्रदं(म्) पुत्रकाङ्क्षिणाम् ॥ 10॥

राज्याय भ्रष्टराज्याना- मशान्तानां(ञ्) च शान्तये ।
भक्त्यर्थं(वँ) विष्णुभक्तानां(वँ), विष्णौ सर्वान्तरात्मनि ॥ 11॥

जाप्यं(न्) त्रिवर्गसिद्ध्यर्थं(ङ्), गृहस्थेन विशेषतः ।
उद्यन्तं(ञ्) चण्डकिरण-मुपस्थाय कृताञ्जलिः ॥ 12॥

तुलसीकानने तिष्ठन्-नासीनो वा जपेदिदम् ।
सर्वान्कामानवाप्नोति, तथैव मम सन्निधिम् ॥ 13॥

मम प्रियकरं(न्) नित्यं(म्), हरिभक्तिविवर्धनम् ।
या स्यान्मृतप्रजा नारी, तस्या अङ्गं(म्) प्रमार्जयेत् ॥ 14॥

सा पुत्रं(लँ) लभते दीर्घ-जीविनं(ञ्) चाप्यरोगिणम् ।
वन्ध्याया मार्जयेदङ्गं(ङ्), कुशैर्मन्त्रेण साधकः ॥ 15॥

सोऽपि सं(वँ)वत्सरादेव, गर्भं(न्) धत्ते मनोहरम् ।
अश्वत्थे राजवश्यार्थी, जपेदग्नेः(स्) सुरूपभाक् ॥ 16॥

पलाशमूले विद्यार्थी, तेजोऽर्थ्यभिमुखो रवेः ।
कन्यार्थी चण्डिकागेहे, शत्रुहत्यै गृहे मम ॥ 17॥

श्रीकामो विष्णुगेहे च, उद्याने स्त्रीवशा भवेत् ।
किमत्र बहुनोक्तेन, शृणु सैन्येश तत्त्वतः ॥ 18॥

यं(यँ) यं(ङ्) काममभिध्यायेत्- तं(न्) तं(म्) प्राप्नोत्यसं(म्)शयम् ।
मम गेहगतस्त्वं(न्) तु, तारकस्य वधेच्छया ॥ 19॥

जपन् स्तोत्रं(ञ्) च कवचं(न्), तुलसीगतमानसः ।
मण्डलात्तारकं(म्) हन्ता, भविष्यसि न सं(म्)शयः ॥ 20॥

इति श्रीब्रह्माण्डपुराणे तुलसीमाहात्म्ये तुलसीकवचं(म्) सम्पूर्णम् ॥